सुगणट् सुसुगणट्त्सु सुगण रसुगणसुभुजन भुक् भुजौ भुग्भ्याम् भुक्षु रा
कू राग राड्डौ राद्धः राड्भ्याम् राट्सु सकं कुप सकु कुव सक कुभौंसक कुब्भ्याम्
सक कुप्सु यजेः पंचसु नम नसमासे इति च द्विषाम् दिशादृश स्पृश दधृषु।
ऋत्विज् कुंचयुं जसवज प्रंच उष्णिहां कुत्वं भवति स्याद्दोरसेपदांतेच पक्ष् 9

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰ सू॰
२४
34

ञ्जौ युञ्जः खञ्जः युजः समासेत्व सयुक् चौंकुः चवर्गस्य कवर्गो भवति धातोर्झसे परे ना
न्तस्य चरसे पदांते च समाधार्थस्य युजेः नुम न युक् खन खञ्जौ खञ्जः खन्भ्याम् खन्त्सु छ
शषराजादेःषः सम्राड् सम्राट् सम्राजौ देवट् देवड् देवजौ परिमट् परिमजौ वि
श्वसट् विश्वसजौ विश्वस्यवसुराटोर्दीर्घः विश्वावसुः विश्वाराट् विश्वराजौ विश्वरा
ड्भ्याम् विश्वाराट्सु विश्वाराट्त्सु स्कोराद्योश्च संयोगाद्योःसकारककारयोर्लोपो
भवति धातोर्झसे परे नान्तस्य चरसे पदांते च भट् भड् भज्जौ भट्सु भटत्सु चसाषः २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वनिमित्ताभावात् षाससन्त्वे स्कारागमश्च दृट् दृड् दृशौ विभ्राट् विभ्राड्भ्याम् ऋ
त्विक् ऋत्विजौ ऋत्विक्षु ऊर्क् ऊर्ग् ऊर्जौ ऊर्क्षु नः त्यदादेस्तस्य सत्वं भवति सौ
परे स्यः त्यौ त्यस्यः नौ ते प्राधान्ये परमस्यः संज्ञायां गौणत्वे चान्त्वसत्वेन त्यद् त्या।
दौ अतित्यद् अतित्यत् अतित्यदौ यः यौ ये एषः एतौ एते एतम् एतौ एतान्।
अन्वादेशे एनम् एनान् एनेन एनयोः अग्निमद् अग्निमथौ अग्निमद्भ्याम्
अग्निमत्सु अन्यच्चत्वतीति क्विपि हन्ते नो लोपः धातोर्हसान्तस्योपधायास्तस्य न।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰पू॰ ३५ 35 कारस्यलोपोभवति क्विंतिपरे पूजार्थाञ्चतेर्नेनानित्युपपदात् क्रुञ्चेः क्विपिन क्रुङ्
क्रुञ्चौ क्रुङ् खत्रु क्रुङ् षु प्राञ्चेः पुंसिपंचस्वनुम् दिशाम् प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः
प्रत्यञ्चम् प्रत्यञ्चौ यचे चेदी घेश्च नलोपिनोञ्चतेरकारस्यलोपः पूर्वस्यचदी
र्घः शसादौस्वरेनद्विन यस्वरयोरीपी कारेच प्रतीचः प्रतीचा प्रत्यग्भ्याम्
प्रत्यक्षु तिर्यङ् तिर्यञ्चौ तिरश्चादयः पूजार्थेन तिरश्चादयोनिपात्यंतेशसा
दौस्वरेनद्विनयस्वरयोरीपीकारेच तिरश्चः तिरश्चातिर्यग्भ्याम् तिर्यक्षु उदङ् ३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उदग्भ्यो उदीचः उदीचा उदग्भ्याम् उदक्षु पितरमञ्चतीति पित्रङ् पित्रञ्चौ अतो।
दीर्घो न पितृचः पितृचा पितृग्भ्याम् पितृक्षु सध्र्यङ् सध्रीचः सम्यङ् समीचः स
मीचा प्राङ् प्राञ्चौ प्राचः पूजायां तु प्रत्यञ्चः प्रत्यंचा प्रत्यङ्भ्याम् प्रत्यङ्क्षु प्र
त्यङ्क्षु प्रत्यङ्षु उदञ्चा उदङ्भ्याम् तिर्यञ्चः तिर्यञ्चा तिर्यङ्भ्यां पित्रञ्चः पि
त्रङ्भ्याम् सम्यञ्चः सम्यञ्चा सध्र्यञ्चः प्राञ्चः अमुमञ्चतीति अमुमुयङ् अमुमु
यंचः अमुमुयग्भ्याम् अदमुयङ् अदद्र्यङ् सहादेः साद्रिरनेने अदशब्दस्य अम्।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰सि॰
पू॰ ३६
36

मुदस्यादेशः पुनः अदमुदस्यादेशः पुनः अदद्रिआदेशाः प्रजायान्तु अमुमुयङ् अमुमु।
यञ्चः अमुमुयञ्चौ अमुमुयङ्भ्याम् अदमुयञ्चः अदद्र्यञ्चः मरुत् मरुद्भ्याम् त्रितो
नुम् न्स्यम्महतोधोदीर्घः सौ च महान् महान्तौ महान्तः हेमहन् द्विरुक्तानां जक्षा
दीनां शान्तर्नुमनशौ वा ददत् ददतौ एवं जक्षत् जाग्रत् दरिद्रत् चकासत् शास
त् प्रभृतयः अत्वसोः सौ अत्वन्तस्याधात्वसन्तस्य चोपधाया दीर्घो भवति सावधौ
भवान् भवन्तौ हेभवन् चन्द्रमाः चन्द्रमसौ अथात्वसन्तस्य किं पिण्डं ग्रसते पिण्ड। ३६

ग्रः चीवराणिवस्तेऽसौ चीवरवः चीवरवसौ शत्रंतस्यन्तुअत्वंतस्याभावान्नदीर्घः

भवन् भवंतौ पचन् पचंतौ दीव्यन् धीमान् हे धीमन् धीमन्तौ मघवान् म

घवंतौ मघवद्भ्यां गुप् गुब् गुब्भ्यां ताहक् ताहशौ ताहक्षु एवंयाहगादयः

नशेःकोवापदांतेस्यादौ झसेच नक् नग् नट् नड् नशौ नग्भ्यां नड्भ्यां नक्षु न

ड्सु नट्त्सु विट् विड् विशौ स्पृक् स्पृग् स्पृशौ घृतस्पृक् उदकपूर्वस्यनकुत्वं

उदकस्पृट् दधृक् दधृग् दधृषौ दधृषः दधृक्षु रत्नमुट् रत्नमुषौ रत्नमु।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बं·सू·
३८
37

ङ्गां रत्नमुड्न्स रत्नमुड्न्स षष्षशब्दोनित्यं बहुवचनांतास्त्रिषुसदृपः जश्शसोर्लुक्

षट् षट् षड्भिः षड्भ्यः ह्लः उकारोणोमभवति नामिपरे षण्णां षट्सु षट्त्सु परमष सू २

ण्णां गौणत्वेन प्रियषट् प्रियषषौ प्रियषषः प्रियषषां दोषां दोषौ दोषांदीनांरोभव

तिरसेपदांतेच दोः दोषौ शसादौवा दोषन् स्तः षकारणकारसंयोगेस्तरन्यदा

रम्भवति दोस्सः दोषः दोर्भ्यां दोषभ्यां दोर्भिः दोषभिरित्यादि विसर्गोनुम् स्था

निकानुस्वारव्यवधानेपिष्विलान्यरस्मात्सस्य षः दोःषु दोष्षु दोषसु योर्विहसे। ३८

पिपठीः पिपठिषौ स्कोराद्योश्च नट् नड् नहौ नट्त्सु नट्सु गोरट् गोरड् गो

रहौ नत्तरहोः संयोगांतस्य लोपः इत्येके नक् नग् नह्य गोरक् गोरग् का।

लोपो कुत्वमसिद्धम् पिपक् पिपग् पिपठौ पिपठः एवं विवक् विवग् दिधा।

क् दिधग् दिधहौ सुपीः सुपिषौ सुपिषः सुपीषु सुपीष्षु एवं सुतूः सुतुषौ

सुतूर्ष्षु विद्वान विद्वांसौ विद्वांसः हे विद्वन् विद्वांसं विद्वांसौ वसोर्वदः व

सोर्वकारस्य उकारः स्यात् शसो दौस्वरे तद्धित यस्य मतघ्नीपो कारेच विदुषः।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰ सू॰
३८

३४

विदुषा विद्वद्भ्यां विद्वत्सु सेदिवान् वसोर्न्वेरुउभावः सेदुषः सेदिवद्भ्यां ऊषिवान्
ऊषुषः ऊषिवद्भ्यां ऊषिवत्सु शुश्रुवान् नधातोः स्विकरणस्यनोर्धातोरिवर्णोवा
र्णयोरियुवौ भवतः स्वरेपरे शुश्रुवुषः शुश्रुवद्भ्यां अपम हच्छेदसाहचर्यादधा
तोर्न्संयग्रहणे तेननिह सुहिन् सुहिंसौ सुहिन्भ्यां सुहिन्सु ध्वत् ध्वंसौ ध्वंसुन्
पुंसोसुङादेशः पुंसिपंचसु शौचपुमान् उकारोन्त्यादेशार्थः हेपुमन् पुंसः पुंभ्यां
पुंसु वेधाः वेधसौ हेवेधः वेधोभ्यां उशनसौ उशनसु पुरुदंशसु अनेहसांसेर ३८

धेर्डीभवति उशाना उशानसौ उसनसोवति धौनांननाग्रदंननावावाच्या संबोधने
नृशानसखिन्नपंसानंनथानमथाप्पदंनंमाध्यंदिनेर्वाष्टिगणांत्विगांतेनपुंसकव्या
च्चपदांवरिष्टः हेउशनन हेउशान हेउशनः उशानोभ्यां उशानःसु उशनस्त्व
सौसः अदसोदस्यसः सौ सरौ अदसः सेरोभवति असौदस्यमःमा अदसोमात्य
रस्यउऊश्चभवति अमूंजमी परीवज्रत्वे अदसपकारईभवति वज्रत्वेसति अमी
अमुं अमून अमुना अमूभ्यां अमीभिः अमुष्मै अमूभ्यां अमीभ्यः अमुष्मात् ।
CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰सू॰ २९ 39

अमुष्य अमुयोः अमीषां अमुष्मिन् अमुयोः अमीषु इति हसंता न्ताः पुल्लिंगाः ॥ नहो
धः नहो हस्य धो भवति धातोर्झसे परे नाम्नश्चरसे पदांते च उपानत् उपानद् उपा
हौ उपानहः उपानद्भ्यां उष्णिक् उष्णिग् उष्णिहौ उष्णिग्भ्यां द्यौः द्युभ्यां द्युषु गीः
गिरौ गिरः गीर्षु एवं पुर् धुर् आदयः चतस्रः प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः
हे प्रियचत्वाः इयं स्त्रियां इदमः स्त्रियामियं सौ इयं इमे इमाः इमां अनया आभ्यां ॥
अस्यै अस्याः अनयोः आसां अस्यां आसु अन्वादेशे एनां एने एनाः एनया एनयोः २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्रक् स्रजौ स्रग्भ्यां स्रत्सु समित् समिद् समिधौ समिद्भ्यां सामित्सुः एवं नदादा

यः वाक् वाचौ वाग्भ्यां वाक्षु ककुप् ककुब् ककुभौ ककुब्भ्यां ककुप्सु त्वक् त्वग् त्व

चौ त्वक्षु ऋक् ऋचौ अपूर्वस्थानि त्यंवक्रू वच नान्तः आपः भिदपां अपादीनांद

त्वं भवति भादौ विभक्तौ अद्भिः अद्भ्यः अपां अप्सुादिक् दिशौ दिग्भ्यां दिक्षु त्विट्

त्विड् त्विषौ दृक् दृशौ सहजषाने इतिसजूः सजुषौ सजूर्भ्यां सजूःषु सजुष्षु

आशीः आशिषौ आशीर्भ्यां आशीःषु असौ अमू अमूः अमुया अमूभ्यां अमी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं.पू.
४.
40

भ्यः अमुष्याः अमुयोः अमुष्यां अमूषु इति हसंताः स्त्रीलिंगाः स्वनडुत् स्वनडु
ही स्वनड्वांहि पुनस्तद्वत् शेषं पुंवत् वाः वारी वारि पुनस्तद्वत् वाभ्यां वार्षु उसे
विमलद्यु विमलदिवी विमलद्दिवि किमः के कानि इदं इमे इमानि अन्वादेशे ए-
नत् एने एनानि ब्रह्म ब्रह्मणी ब्रह्माणि हे ब्रह्मन् हे ब्रह्म अह्नः अहन् शाहस्य
सो भवति रसे मदौ नेच अहः अह्नी अहनी अहानि अह्ना अहोभ्यां कर्म कर्म-
णी कर्माणि एवं चर्मन् वर्मन् धर्मन् दंडि दंडिनी दंडीनि स्रग्वि स्रग्विणी स्र ४.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्मीणि वाग्मि वाग्मिनी वाग्मीनि बहुवृत्र बहुवृत्रघ्नी बहुवृत्रहणी बहुवृत्रहा-
हाणि बहुपूष बहुपूषणी बहुपूष्णी बहुपूषाणि बहुर्यम बहुर्यमणी बा-
हुर्यम्णी बहुर्यमाणि असृक् असृजि शसादौ वा असन् असानि असना अस-
ष्णां ऊर्क् ऊर्ग् ऊर्जी ऊर्जि बहूर्ज्जीनुम् प्रतिषेधः अन्त्यात्पूर्वो वा नुम् बहूर्ज्जि
बहूर्ञ्जि त्यद् त्यत् त्ये त्यानि तत् तद् ते तानि यत् ये यानि एतत् एते एतानि ।
अन्वादेशः एनत् एने एनानि वेभिन् वेभिदौ वेभिदि सयदं नस्य शो जुम् चेति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰ सू॰ ४१
41

त चेच्छिदीचेच्छिदि गवाकृशदस्य तपाणिह्नौ वेर्चा गतिभेदतः असंध्यगगमात्नौचै

नेवाध्यिकशतंमतं १ स्यमस्तु प्तनवमङ्गादोषड्केस्य स्त्रीणिजश्शमोः चत्वारिंशे

षदशाहस्पाणीति विभावय गवाक् गवाग् गोअक् गोअग् गोक् गोग् ॥ ॥ ॥

गवाङ् गोअङ् गोङ् गोची गवांची गोअंची गोंची गवांचि गोअंचि गोंचि अ

चेदीर्घस्य इत्यनेनादेोअकारस्य लोपः पुनश्च परस्य अच्चत्ति नास्ति तिर्यक् तिरश्ची

तिर्यंचि तिर्यङ् तिर्यंची तिर्यंचि यकृत् यकृती यकृंति यकानि यकृन्नायकृताम ४२

कृद्भ्यां शकृत् शकृती शकृंती शकानि शक्ना शकभ्यां शकृद्भ्यां ददत् ददती द

दति ददंति एवं जाग्रदादयः वादीवेशान्तः अवर्णान्नाम्नस्स्पशतृवीनुमोकारे

ईपि च परे तुदंती तुदती तुदंति भात् भाती भांती भांति अप्ययोरान्नित्यं अप

त्ययप्रत्ययसंबंधिनो वर्णान्नाम्नस्स्पशतृर्नुम् नित्यमीकारे ईपि च पचत्

पचद् पचंती पचंति दीव्यत् दीव्यंती दीव्यंति स्वपत्यवस्वपी संज्ञपि दीर्घोनेस्प

केसंपिस्वयाभिदयां स्वद्भ्यां जगत् जगती जगंति महत् महती महांति घन्तुः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰ पू॰
४२
92

धनुषीन्व एवैसस्यशेषो दीर्घः धनूंषि हविः हविषी हवींषि पयः पयसी पयांसि तेजः
तेजसी तेजांसि वचः पिपठीः पिपठिषी सयडंतशेषो नम्वत् पिपठिषि सुपम् सुपुंसी
५ सुमांसि अदः अमू अमूनि इति हसांता नपुंसकलिंगाः॥ ॥ त्वमहमिना सिसहि
तयोर्युष्मदस्मदोस्त्वमहमित्येतावादेशौ भवतः त्वं अहं युवां वा द्विवचने ह्यर्थवा
चिनोर्युष्मदस्मदोर्युवावावादेशौ भवतः विभक्तौ आमौ युष्मदस्मद्भ्यां परं ङेभ्याम्
भवति युवां आवां यूयं वयं जसा जसासहितयोर्युष्मदस्मदोर्यूयं वयं इत्येतावादे ४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शौ भवतः यूयं वयं त्वन्मादेकत्वे युष्मदस्मदोस्त्वन्मदौ भवतः एकत्वेगम्यमा

नेष्याम्भौ युष्मदस्मदोष्टेरात्त्वं भवति अमिसकारोऽमिसचपरेत्वां मां युवां आवां

त्मदादेष्टेरत्वे कृते शसोमीति दीर्घंशसोनेवक्तवः युष्मान् अस्मान् त्वन्मदादेशेकृ

ते एटाड्ड्योः युष्मदस्मदोष्टेरेत्त्वं भवति टाड्ड्योः त्वयामयायुवाभ्यांयुष्माभिः अस्मा

भिः तुभ्यंमह्यंङया ङयासहितयोर्युष्मदस्मदोस्तुभ्यंमह्यमेतौ भवतः तुभ्यं

मह्यं भ्यसस्शभ्यम् युष्मदस्मद्भ्यांपरोभ्यसःशभ्यम् भवति शकारोमकारादित्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰सू॰ ४३

43

व्याद्यन्यर्थः तेनान्वैत्त्विन युष्मभ्यं अस्मभ्यं ङसिभ्यसोः स्तः ङसि सा हर्चोत्त्वं चम्या

भ्यसत् गृह्यते त्वत् मत् युवाभ्यां आवाभ्यां युष्मत् अस्मत् तवममङसा ङसा

सहितयोर्युष्मदस्मदोस्तवममौ भवतः तव मम युवयोः आवयोः सुडामः सा।

माकं युष्मदस्मद्भ्यां परः साम आकं भवति युष्माकं अस्माकं त्वयि मयि युव।

योः आवयोः युष्मासु अस्मासु समस्यमाने द्व्येकत्ववाचिनो युष्मदस्मदोस्समा

सार्थोन्यसंख्यत्वेपि युवावौ त्वमदावपि ॥ सिजसि ङे ङस् त्वपरतः आदेशाः स्युः ४३

सैदेवनेत्वाहौ यूयवयौ नश्च महौ नवममावपि २ एते परत्वाद्यत्वे युवावौ वि
षये स्वके त्वन्मदौ वापि वाधंते पूर्ववद्द्विषये स्वके २ ह्येकसंख्याः समासार्थो
वह्वर्थे युष्मदस्मदी नयो रद्व्येकतार्थत्वान् युवावौ त्वन्मदौ न च ४ त्वां मां।
-वातिक्रांतस्तिविग्रहे अतित्वं अत्यहं गौणत्वेपि युष्मदस्मदोः त्यदाद्यत्वं
भवति अतित्वां अतिमां अतियूयं अतिवयं अतित्वां अतिमां अतित्वां अ
तिमां अतित्वान् अतिमान् अतित्वया अतिमया अतित्वाभ्यां अतिमाभ्यां अ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰ऋ॰
४५
४५

तित्वाभिः अतिमाभिः अतित्वभ्यं अतिमह्यं अतित्वाभ्यां अतिमाभ्यां अति।
त्वभ्यं अतिमभ्यं अतित्वत् अतिमत् अतित्वाभ्यां अतिमाभ्यां अतित्वत् अति
मत् अतितव अतिमम अतित्वयोः अतिमयोः अतित्वाकं अतिमाकं अतित्व
यि अतिमयि अतित्वयोः अतिमयोः अतित्वासु अतिमासु युवां आवां वा अतिक्रां
तइतिविग्रहे सिजसङेङस्सुपरतः आवत् अन्यत्रयुवावौ अतित्वं अत्यहं अति।
युवां अत्यावां अतियूयं अतिवयं अतियुवां अत्यावाम् अतियुवान् अत्यावा। ४५

न् अतियुवया अत्यावया अतियुवाभ्यां अत्यावाभ्यां अतियुवाभिः अत्यावाभिः
अतितुभ्यं अतिमह्यं अतियुवाभ्यां अत्यावाभ्यां अतियुवभ्यं अत्यावभ्यं अति-
युवत् अत्यावत् अतितव अतिमम अतियुवयोः अत्यावयोः अतियुवाकं अत्या-
वाकं अतियुवयि अत्यावयि अतियुवासु अत्यावासु युष्मानस्मान्वाऽतिक्रांति इ-
ति विग्रहे सिजसेङ्ङसु प्रागवत् अतित्वं अत्यहं अतियुष्मां अत्यस्मां अत्यस्मान् अ-
युष्मया अत्यस्मया इत्यादि युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमेवांनौवस्न

चं॰सू॰
४५
45

सौ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिः सहितयोर्यथासंख्येनास्नौआदेशा भवं
ति तत्रैकवचनेन सह तेमे द्विवचनेन सह वांनौ वहुवचनेन सह वस्नसौ त्वामामा ।
समासहितयोर्युष्मदस्मदोस्त्वामापत्तौ भवतः श्रीशस्त्वावतु मापीह दत्तात्तेमेपिश
मे सः स्वामीतेमेपिसहरिः पातुवामपिनौ विभुः सुखंवान्नो ददात्वीशः पतिर्वाम
पिनो हरिः सोऽव्याद्वोनः शिवंवोनो दयात्सेव्योत्रवः सनः एकवाक्येयुष्मदस्मदो
रादेशाः कर्त्तव्याः एकाख्यातंवाक्यं तेनेहनओदनंपचतवभविष्यति इहतुभवत्ये ४५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वशालीनांत्तेडादनं दासपामि ध्वनन्वादेशे वा अन्वादेशे नित्यं धाताते नववाभक्तोस्ति न
सैनेहहरये नमः नादौ वाक्यादौ पादादौ वर्त्तमानयोर्युष्मदस्मदोर्नैते आदेशा भवंति ।
त्वांमांपातु वेदैरशेषैः संवेद्योऽस्मान् कृष्णः सर्वदावतु विशेष्यपूर्वसंबोधनेनत्र ।
पूर्वसंबोधनं च हित्वान्यस्मात्संबोधनास्परयोर्नैते देवास्माहि नहरे विश्वोस्मान र
क्षसर्वदा विशेष्यपूर्वात्तु हरेकृपालो नः पाहि संबोधनेनत्र पूर्वात्तु सर्वदा रक्षदेव
नः अन्वादेशे यथा नानार्थे धातुभिर्योगेनचैते चेतसा स्मर्त्तेसमीक्षते भक्तस्तव रूपं ध्यायति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चादयश्चाने भक्तास्तापर्यंतिचन्तषा विद्यमानपूर्वोत्तपमानान्नानपर्ययोरन्वादेशो।
येतेवा भक्तस्त्वमप्यंहन्नेनहस्तिंखाद्यतेसमांत्वामेतिवोचादिभिश्च चादिभिर
वियोगेनैतेष्वादेशाभवंति श्वावयोर्युवयोश्चेशोहरिंमामेवरक्षतु च वा ह ।
अह एव चादयः चादिर्निपातः च वा ह अह एव एवं नूनं शश्वत् यु
गपत् भूयस् नहि हंत विना नाना स्वस्ति अस्ति दोषा नक्तं मृषा मिथ्या मिथ
स् अथ अथो अहो हाम् श्वस् उच्चैस् नीचैस् शनैस् ऋधक् ऋते आरात्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीं वहिस् अवस् समया निकषा अ-
ह्वा वत् सामि सना सनत् सनात् तिरस् अंतरा अंतरेण सहसा अलं वषट् द-
मा विहायसा प्रा मिथो प्रायस् मुहुस् सार्द्धं साकं समं नमस् हिरुक् धिक् मा
माउः स्वर् अंतर् प्रातर् पुनर् सन्नुतर् यावत् तावत् स्वाहा स्वधा तथाहि खलु
किलैव सह उह सखं डःखं श्रा दह उपसर्गस्वरविभक्तिप्रतिरूपकाश्च अवदा-
तं वदतं अहंयुः हेतौ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ पशु शुकं यथा।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सि॰ चं॰
पू॰
५७
47

कथा तथा स्यात् यात् अङ्ग हे है भो अयि रे विषु अरे एकपदे झाक् मंक्षु माङ् उ
त युत आनत वौषट् श्रौषट् फट् तत्रादिर्विभक्त्यर्थे निपात्यते तस्मिन्निति अत्र तत्र
यत्र कुत्र सर्वत्र अर्वत्र अन्यत्र क्व कुह तेन प्रकारेण तथा यथा सर्वथा उभया
था अन्यथा कथं इत्थं तस्मादिति ततः एतस्मादितः यतः अस्मादित्यतः अतः स
र्वतः विश्वतः बहुतः उभयतः कुतः सार्वविभक्तिकस्तसिल् एके आदितः मध्यतः
अंततः पूर्वस्मिन्निति पुरतः पुरस्तात् अधः अधस्तात् ऊर्ध्वं उपरि उपरिष्टात् पर ५७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्मिन्निति परेता दक्षिणेन दक्षिणा दक्षिणातः उत्तरतः दक्षिणास्मांदिशि दूरे दक्षिणा।

हि नदथी नक्ताल्पयोर्दास्तान राज्ञोथीनंराजस्तान सर्वंभस्म भस्मसात् उरी

ऊरी उररी विस्तारांगीकारयोः सह्यादिनि पात्यने समानेक्ति सद्यः अधुना इदा

नी तस्मिन्कालेतदा यदा कदा सर्वदा एकदा अन्यदा सपदि साप्रतं संप्रतं क

टति तूर्णी याशु शीघ्रं पूर्वेद्युः परेद्युः अन्येद्युः ऐषमः परुत् परारि अपरेद्युः अ

न्यतरेद्युः उभयेद्युः तर्हि यर्हि कर्हि एतर्हि प्रादिरुपसर्गाः प्र परा अप सम अनु।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰ मू॰
४८
48

अवंनिर् निस् दुर् दुस् अभि वि अधि सुउत् नि प्रति अति परि अपि उप आङ् प्रत् अंतर
आविर् प्राग्धातोः उपसर्गाः धातोः प्राक् प्रयोक्तव्याः तदव्ययम् चाद्यव्यय संज्ञं भवति ।
क्त्वाद्यंतंच क्त्वा ल्यप् तुम् णम् डाधा द्विशस् वत् कृत्वस् स आम् इत्याद्यन्तमव्ययसं
ज्ञंस्यात् अव्ययाद्विभक्तेर्लुक् न तत्र शनिर्देशे सदृशंत्रिषुलिंगेषु सर्वासु च विभक्तिषु व
चर चनेषु सर्वेषु यन्न व्येति तदव्ययम् १ वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव ।
सान्तानां यथा वाचा निशा दिशा २ अवगाहः गवाहः अपिधानम् पिधानम् इत्या । ४८

व्ययानि अादतः स्त्रियाम् अकारान्तान्नाम्नः स्त्रियां वर्त्तमानात् टाप् प्रत्ययो भवति सर्व्वा

मया जाया अजादेश्च अजा एडका अश्वा चटका मूषिका बलाका वत्सा होढा ।

मन्दा विलाता सफला भस्त्रफला अजिनफला शणफला पिण्डफला सत्पुष्पा प्राक्

पुष्पा काण्डपुष्पा प्रत्यक्पुष्पा एकपुष्पा शूद्रा क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनि

ष्ठा मध्यमेति पुंयोगेपि कोकिला जाताववि अमूलात् न्पादि पादो वा ईप् द्विपदी ।

द्विपाद् द्विपात् कापनः कापि परे पूर्व्वस्या का रस्येकारो भवति कारिका पाचिका

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं.पू.
४९
49

अन्तःकिम् नौका द्विपकादीनांन द्विपका ध्रुवका वान्यका चटकाय कासका उपन्य
का अधित्यका नारका ज्योतिषि अन्यत्रनैरिका वर्णिका नान्तवेकार्णिकान्या वर्तका
घाकुनै प्राचाम् उदीचांन्तवर्त्तिका अष्टका स्वाङ्गे अष्टकान्या द्वाविंदा सूतिका सू
तका पुत्रिका पुत्रका वृंदारिका वृंदारका आर्यका आर्यिका निर्भस्त्रका निर्भस्त्रिका
पक्षिका पक्षका अजिका अजका ज्ञका ज्ञिका द्वके द्विके निस्त्रिका निस्त्रका हृस्वा
वा कापिपरेनरादौच पूर्वस्य हृस्वोवाभवति गंगाका गंगकानदीकानदिका श्रेय ४९

सितरा श्रेयसीतरा वाग्रहणा देवमन्ध्यात्तराणां नैत्वं गोका नौका नृणाईपु दणिउ

नीमद्योनी भनीकर्त्री यस्यलोपः स्वर्णावर्णयोर्लोपो भवति तद्धितयस्वरयोरी।

पिच औपगवी पेन्द्री ईयानोलोपः राज्ञी द्विदाम्नी श्वित्नः षकारटकारोकारस्त्र

कारानुवन्धात्स्त्रियामीपुस्यात षवराकीं टकुरुचरी उगोमती विदुषी ऋप

चन्ती दीव्यंती तुदती तुदंती मनंतान्नेप सीमासीमानो यत्रंनाहन्नुत्रीहेर्न

स्त्रनंतत्वाद्वहुव्रीहेः ईपून स्यात् वहुयज्वा उाद्वा सीमासीमे दामा दामे वहु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कं॰ सू॰ यज्वा वहुयज्वे वहुयज्वी उपधालोपिनो वेप् वहुराज्ञी वहुराजा वहुराजे वहुराजा
५० 50 वहुराजानौ नदादेः स्त्रियामीप् नदी गौरी सोपर्णेयी उरुमात्री आदिकी रत्वरी
चौरी तैरणी पौंस्नी शाक्तीकी याष्टीकी गार्गी गार्ग्या पणी लौहित्यायनी कात्या
यनी कौरव्यायणी मांडूकायनी आसुरायणी इत्यादि द्विगोःसमाहारेगुणाञ्च त्र
याणांसमाहारः त्रयी द्वयी अनंत्यवयोवाचिनोऽदंतात्स्त्रियामीप् कुमारी कि
शोरी वधूटी चिरंटी तरुणी तलुनी अदंतात्किं शिशुः अनंत्यात्किं वृद्धा स्थवि ५०

रा ऊधसोनङ् ऊधोन्तस्य बहुव्रीहेर्नङादेशः स्यात् स्त्रियामीप् कुंडोध्नी घटोध्नी ग्र
न्थोध्नी स्त्रियांकिं कुंडोधः धेनुकं बहुव्रीहेः किं उधोतिक्रांता अत्यूधाः वयोवाचि
नोहायनस्यप् त्रिचतुर्भ्यांणत्वं त्रिहायणी चतुर्हायणी त्रिचतुर्भ्यांकिं षष्टहाय
नी वयोवाचनः किं चतुर्हायना शाला इंद्रादेः आनीप् स्त्रियांपुंयोगेच इंद्राणी
वरुणानी भवानी सर्वाणी रुद्राणी आचार्या दणत्वं आचार्यानी हिमारन्ययो
र्महत्वे महद्धिमं हिमानी महदरन्यं अरण्यानी यवाद्दोषे दुष्टोयवोयवानीय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰पू॰
५८
51

मातुलानी मातुली त्वम

वनाहिम्यां यवनानी मातुलोपाध्यायाभ्यां वा मातुलानी मातुली [redacted] उपाध्याया
नी उपाध्यायी आर्यक्षत्रियोपाध्यायेभ्यो वा स्वार्थे आर्याणी आर्यी क्षत्रियाणी क्षत्रि
या उपाध्यायिनी उपाध्याया पुंयोगेच अदंतात्स्त्रियांमीप् शूद्री गणकी पालिकांता
त्त गोपालिका अश्वपालिका सूर्याद्देवतायामाप् सूर्यस्यस्त्री देवता सूर्या अन्यासू
री जातेरस्त्रोपधात् जातिवाचिनोऽयकारोपधादकारांतात्स्त्रियामीप्प्रत्ययो भवति
महिषी हंसी योपधात्तु क्षत्रिया वैश्या क्वचिन्न वलाका गवयहयमकयमनुष्य ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मत्स्यानां त्र निषेधः गवयी हयी मुकयी हलातद्धितयस्योपिलोपः मनुषी ईपिमत्स्य

स्ययलोपः मत्सी सूर्यागस्त्ययोरीये ईपिच सूरी अगस्ती तिष्य पुष्ययोर्नक्षत्राणिय

लोपः तैषी पौषी जानपदीत्यतिस्त्रेत् जानपदान्या कुंडी अमत्रे कुंडान्या गोणी अ

वपने गोणान्या स्थली अकृत्रिमायां स्थलान्या भाजी श्राणा चेत् नागीस्थूला चेत्

काली वर्णः चेत् कालान्या नीली औषधिप्राणिनोः नीलान्या संज्ञायां वा नीली नी

लारक्तसाटी न्यर्थः कुशी अयोविकारे कुशान्या कामुकी मैथुनेच्छायां कामुकान्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं॰सू॰
५२
52

कबरी केशविन्यासे कबरान्ता शोभनाद्धा शोरणी शोणा बहुव्रीहेर्ज्जानिपूर्वपदात् क्तांतात्
उरुभिन्नी शोभनं तनाम दंतजाता असांग पूर्वपदाद्वा स्वरापीनी स्वरापीता पाणिगृहीती
भार्यायां अन्यापाणिगृहीता क्रीतांतात्करणादेः वस्त्रक्रीती धनक्रीती करणादेरिति
किं गवक्रीता अश्वेनक्रीता क्रादल्पत्वे अभ्रलिप्ती द्यौः अल्पत्वे किं चंदनलिप्ता स्वांगा
द्वा स्वांगवाचिनो दंतादसंयोगोपधाद्नुपसर्जनाद्वास्त्रियामीप् सुमुखी सुमुखा चा
रुनयनाकमलनयना सुकेशी सुकेशा असंयोगोपधात्किं सुगुल्फा उपसर्ज्जनात्किं शो ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भनाशिखासशिखा नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च नंगनासिकी नंगनासिका
मंदोदरी मंदोदरा मंदोदरा विंबोष्ठी विंबोष्ठा सजंघी सजंघा सदंती सदंता सका।
र्णी सकर्णा सशृंगी सशृंगा अंगगात्रकंठपुच्छान्न वा ईप् सांगी सगात्री सगात्रा।
सकंठी सपुच्छी पदेस्वांगेत्यादि कवरमणिविषशरेभ्यः परात्पुच्छान्नित्यं कवरपु
च्छी विषपुच्छी मणिपुच्छी शरपुच्छी उपमानात्पक्षेपुच्छाभ्यां श्येनपक्षी श्येनपुच्छी
नक्रोडादिवह्वज्स्वरान् कल्याणक्रोडा सजघना पद्मवदनाकमलनयना सहनज विषमा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सं॰सू॰
५२
53

न पूर्वोक्त सकेशा अकेशा विद्यमाननासिका नखमुखात्संज्ञायां सूर्पणखा गौरमुखा संज्ञायां
किं नाम्नमुखीकन्या वौर्गुण्यात् उदंताद्गुणवाचिनो वा स्त्रियामीप् पट्वी पटुः वह्वी वहु स्वरसं
योगोपधान्न खरुः पांडुः कृदिकारादक्त्यर्थात्वा अक्त्यर्थात्कृतिसंबंधेन इकारांतान्वा
स्त्रियामीप् स्यात् रात्रिः रात्री शकटिः शकटी अक्त्यर्थात्किं भूतिः अजननिः पद्धत्यादिभ्यो
वा पद्धतिः पद्धती पेचमन्वादेः मनपूतक्रतु वृषाकपयग्नि कुसित कुसिदानामै आदेश
ईप् स्त्रियां योगे च सूतक्रतायी वृषाकपायी अग्नायी कुसितायी कुसिदायी मनोरै औ वा ।
मनायी मनावी मनुः पत्यादयो निपात्याः पत्नी सपत्नी एकपत्नी वीरपत्नी सखी । ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अशिश्वी अनड्वाही अनडुही प्राची प्राची प्रतीची प्रत्यंची वा विद्वाहदपतिः इद

पत्नी वृषलपत्नी वृषलपत्नी पत्तापत्नी हरिता हरिणी रोहिता रोहि श्येता श्ये

नी असिता असिक्नी पलिता पलिक्नी इत्यादि इतो मनुष्यजातेरीप् दाक्षी अ

वंती कुंती ऊनऊः उदंतादयोपधान्मनुष्यजातिवाचिनःस्त्रियाम्सूः कुरूः अयोप

धात्किं अध्वर्युः स्त्री पंगोश्च पंगूः श्वशुरस्योकाराकारयोर्लोपऊश्च श्वश्रूः उपमा

नवाचिपूर्वपदादूरूत्तरपदादूः करभोरूः सहितशफलक्षणवामसहितसहा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लिंगार्थ॥ लिंगं चार्थश्चानयोः समाहारो लिंगं॥ तस्मिन् लिंगार्थे॥ अर्थे प्रथमेत्युक्ते कस्यार्थे इत्याकांक्षायां यस्मान्नाम्नः स्वादिर्विभक्ति
र्विहिता तस्य नाम्नोऽर्थे॥ २॥ यस्मिन्नाम्नि उच्चारिते सति यस्यार्थस्य नियमेनोपस्थितिः स नियतोपस्थितिकः॥ स एव शक्य इत्युच्यते॥
आनियतलिंगग्रहणार्थं लिंगेति॥ यद्यपि लिंगमात्रे इत्येतावता तदर्थस्य प्राप्तिर्नामार्थं विना लिंगादि प्रतीतेरसंभवात् अधिके इत्युक्ते॥
ननु सिंहो माणवक इत्यादौ लाक्षणिकपदे प्रथमा न स्यात्॥ इति चेदुच्यते॥ शक्यार्थमात्रापेक्षया प्रथमा विभक्तिरुक्तः तौ समस्तात्पर्य ज्ञाता त्पदान्तरसमभिव्याहारे

देवेनोपमेपि संहितो रूः शफोरूः लक्षणोरूः सहितोरूः सहोरूः नृनरयोर्वृद्धिश्च नारीस् लक्ष्यार्थबोधो स्त्रीति॥
ननु वीरः पुरुषः इत्यादौ

नस्तिः युवनशब्दात्स्त्रियां तिः युवतिः इति स्त्रीप्रत्ययः॥६०॥ लिंगार्थे प्रथमा नामार्थमा ज्ञायमानस्यात् ... भेल

नियतोपस्थितिर्यस्य स नियतोपस्थितिकः

त्रे लिंगाधिक्ये च प्रथमा विभक्तिः नियतोपस्थितिको नामार्थः उच्चैः नीचैः कृष्णः पुरस्कृत्य भेदसंसर्गस्याऽधि
कस्य भानात्॥ उच्यते॥ अ
त्र पदसंस्कारपक्षाभ्युपग

श्रीः ज्ञानं खारी द्रोणः प्रातकं एकः द्वौ बहवः अलिंगा नियतलिंगाश्च नामार्थमा मेऽपि तिनो तरंगत्वात्प्रथ
मप्रवृत्तपदसंस्कारेण प्रथ

त्रे इत्यस्योदाहरणं अनियतलिंगास्तु लिंगमात्राधिक्ये इत्यस्य तटः तटी तटं मा रूपे कृते पश्चाद्वृद्धिरेग
त्यादेऽभेदसंसर्गो वाक्यार्थः

आमंत्रणे च अभिमुखीकरणे प्रथमा हे देव हे देवौ हे देवाः भोस भगोस अ

घोस भवत भगवत अघवत् वा निपातनाधौ भो हरे भगो नमस्ते अघोपाहि ५४

अनभिमुखस्याऽभिमुखः क्रियतेऽनेनेति अभिमुखीकरणं॥ अनुकूलकरणं॥ तत्र प्रथमा भवति॥ = २

हे देवेत्यस्य ... संबोधन ... हे भोः हे भवन्॥ हे भगो हे भगवन्॥ हे अघो हे अघवन् हे पापि ... त्यर्थः॥ = २
संबोध्य ...
... वर्तमानो व्यापारः।

उच्चैरित्यपदत्वाद्विसर्गासिद्धिः॥ किंचाप्रयुज्यमानत्वात्संग्राम
उच्चैस्तन संग्राम उच्चैर्हले इति विद्यमानपूर्वा इति निषेधेन नेमे
आदेशपयोर्विकल्पसिद्धिरपि फलं॥ कथं॥ अयं नीलद्रव्ये अनि
यतलिंगत्वापि वा सत्वे नियतलिंगा वा॥ ननु एको द्वौ बहवः
इत्यत्र नामैव वृ. स्वाभिधानात् प्रयुज्यमानस्यात्॥ उच्यते॥ न केवला
प्रकृतिः प्रयो वं. प. ५४ क्तव्या न च केवल प्रत्ययः इति नियमात्प्रथ
मोत्पत्तिर्वा॥ अनियतं लिंगं येषां ते अनियतलिंगाः

54

शेषाः कार्यकर्त्रोः साधनयोः दानपात्रे विश्लेषावध्योः संबंधाधारभौयोः द्वितीयाद्या
विभक्तयः षष्ठ्यर्थेषु भवंति कार्यैकर्मकारके द्वितीया कटं करोति कारुको रूपं पश्यति चा
क्षुषः राज्ञ्या प्राप्तो निधिर्मिहिरः सो मम नो नि सोमपापां कर्त्रीरि करणे तृतीया भिन्नः श
रेण रामेण रावणो लोकरावणः कराग्रेण विदीर्णोपि वानेरर्ये द्वनेपनः दान
पात्रे चतुर्थी वेदविदे गां ददाति क्रियया यमभिप्रैति सोपि चतुर्थी पत्ये शेते रा
जेकरं ददाति विश्लेषो विभागस्तस्यावध्यो पंचमी हिमवतो वनरतिर्गंगा।
धावतो श्वात्पतति संबंधे षष्ठी राज्ञः पुरुषः आधारे सप्तमी औपश्लेषिकः सा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

माधारे सप्तमीति॥ आधिपते क्रियास्मिन् इति त्वाधारः॥ सआधारः षड्विधा अस्येति षोढा उपउपरिश्लेषः उपश्लेष सोस्यास्ती
उपश्लेषेण वर्त्तते इति औपश्लेषिकः॥ सामीप्यं सान्निध्यं सोस्यास्तीति सामीपिकः। अपपादेशायोरायेपाद्योपयोः सर्वो वस्तुस्तिवंधिकः
इति आभिव्यापकः वा आधितो व्याप्यते आधेयेनेत्यभिव्यापकः। अनन्यत्रभावो विषयः तस्य भावो विषयः। निमित्तं रस्यास्तीवा
अन्यत्र विद्यमानस्य संबंधस्यान्यत्रारोपः उपचारः उपचारेभवः औपचारिकः अजरामुस्याधारस्य पेम्ब्रः। प्रकृत्य पक्षस्यामेदे

5+ संवंधे षष्ठीति॥ संवंधस्य संवाधेमिलत्वे सतिसंवंधा अपत्वम्॥ ससंवंधो द्विविधः क्रियाकारकसंवंधो द्रव्य गुणादिसंवंधश्चेति॥ क्रिया

54A चं॰ सि॰ कारकसंवंधो द्विविधः विशेषः सामान्यं चेति तत्र विशेष कर्मत्वादिरूपविहिता अपवादभूता द्वितीयादयो विभक्तयः॥ सामान्य संवंधे तत्र षष्ठी उक्तं च॥ संवंधः कारके भ्योन्यः क्रियाकारकपूर्वकः श्रुतायां श्रुतायां च क्रियायां सोभिधीयते॥

मोपिकोभिव्यापकोवैषयिकोनैमित्तिकऔपचारिकश्चेति मोढा [redacted] कटेशेतेकुं

एकदेशसंनिधानस्य कल्लोलिआधारतस्मै...

मारोसौवृद्देगावःसंशेरते तिलेषुविद्यतेतैलंहृदिब्रह्मामतपर मुद्देसन्नेहामे

धीरोगुल्मोकेकिरणाशत्त कूपालदागभावस्तत्रापिसप्तमी वर्षतिदेवेचौरोर्थ

याताः [redacted] गोषुदुह्यमानासुगतःचौरः विनासहता

मक्ष्नेतेनिर्द्धारणस्वाम्यादिभिश्चपतेर्योगेद्वितीयाद्याविभक्तयः विनादियोगेद्वि

तीया विनापापंसर्वपलति ग्रंथरेणाविल्लीकिंजीवनेन ग्रंनराणंवामांहरिः

जपमन्तप्रावर्षति उपहरिसेना नदीमन्ववसितासेना घ्नतिदेवान्कृष्णः प्रमि

न तसंस्रेजे एत आश्रय पेविशे षणं अत्र अपस्त क्रियायाः विशेषणं भवति

एकदेशसंनिधानेन... कुतेकदेशा... पितः तान्... ते माता चा प्रक्यार्थ...

भवनं भावः॥ क्रियाभवनं तेनहेतो रूपतां बोधक भिन्नि अनु चरः॥ अपरिसिद्ध क्रियाबोधकता सिद्धक्रियातदुक्तः सप्तमी देवावर्षिणि अपकाया। अप्रसिद्ध क्रियातयोपलक्षितेन भूते पतायते तेन तत्पश्चात्...

पविवधतावाकं नरनगीतंम एतोति मावान्मस्या ता॥ इतरं ए संवंधो वाच्यो ताः प्रस्ताव अन्यस्य व कोरूपः
रातः रूद्रः अत्र वितार्थरूपः तत्रलं वटः अनवनावपवीरूपः वटस्य रूपं गएाणतीरूपः माया एतां रागेः आत्रस
तस्य हस्महीतरूपः कुरूपं गराजायायाल पाल कोरूपः चैत्रस्य गृहतं वा द्यावा कोरूपः अनिर्दूपः
राज्ञसार्थः अत्रेनाथे नाचक रूपः॥ वद्ध बोनिपवो रूपं अतरं वो द्धवो द्धकरूपः परस्यामानः पृसिथोप
तुवेणरूप॥ उपयोगरवत्यो तत्रसत्ताप तावद्रूपः ननु संवंधसोमपप्रियतातकस्मात्समात् उच्यते वक्ष्यपतिमु मेदन॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अपतः ग्रामम्।। धिगिति निर्भर्त्सने तस्मिन्पो
पर्वतस्योपरि समीपदेशे इत्यर्थः
सुखं समीपकाले एव दुःखस्य वर्तीत्यर्थः

कालाध्वनोरिति कालस्या
ध्वा च तौ तयोः कालाध्वनोः
निर्गतमन्तरं यस्मात् तत् नि
रंतरं तस्य भावो नैरंतर्यं
तस्मिन्।। क्रियागुणद्र
व्यैः कालाध्वनोर्नैरंत
र्ये संबंधे कालवाचका
त् द्वितीया। मासमधीते
निरंतरमासमध्यय
क्रिया। निरंतरमास
संबंधि एकाध्ययोग्य
यत्ना कुलो वर्तीका
नोकाकारे।

मूर्द्ध

तोग्रामं सर्वतो नगरं धिग्जाल्मं उपर्युपरि पर्वतं अध्यधि सुखं अधोऽधो ग्रामं

का स्त्रिद्वपे

उभयतो हंसं एवं परितः समया निकषा च प्रतियोगेऽपि ग्रामं समया शत्रुर्हतः ग्रा
मं निकषा यज्वानो वसंति हा हरिभक्तं बुभुक्षितं न प्रतिभाति किंचित् काला
ध्वनोर्नैरंतर्ये मासमधीते क्रोशं पर्वतः मासं गुडधानाः मासं कल्याणी क्रोश
मधीते क्रोशं कुटिला नदी हंसं परिविध्यत्ववा हरिमभि अधिभूर्वीणां शौडः ।
स्यामामा धारः कर्म अभिनि पूर्वस्य विशः उपान्वध्याङ् पूर्वस्य वसः अधिशे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं० सि०
548

तैः अधितिष्ठति अध्यास्ते वा वैकुंठं हरिः अभिनिविशते सन्मार्गं उपवसति अनुव
सति अधिवसति आवसति वा वैकुंठं हरिः नाम्नः कार्यस्य वने उपवसति इत्यादि
सहादियोगे तृतीया सह शिष्येण आगतो गुरुः एवं साकं सार्द्धं समं योगेपि येनां
गविकारः येनांगेन विकृतेनांगिनोंगविकारो लक्ष्यते ततस्तृतीया अक्ष्णा काणः
अंगविकार इति किं अक्षिकाणं किंचित्प्रकारं प्राप्तस्य लक्षणे जटाभिस्तापसः
प्रकृत्यादिभ्य उपसंख्यानं प्रकृत्या चारुः प्रायेण याज्ञिकः गोत्रेण गार्ग्यः समेनेति वि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रोणपरमितधान्यमल
वाचको द्रोणशब्दः॥

सुखदुःखं पाति॥

तोलनं तुला तत्कल्पा।
सुमितं तुल्ल [illegible] प्रत्ययः
तीतो वर्त्तिच [illegible] भावः
तुलार्थ वाचकपदं

घसेरोगति द्विद्रोणेन धान्यं क्रीणाति सुखेन दुःखेन याति तुलोपमावर्ज्जे तुल्या

तृतीयावां र्थयोगे कृष्णेन [illegible] तुल्यः रामेण सदृशः तुलोपमेति किं कृष्णस्य तुला उप

मा [illegible] सदृशः तुला नास्ति फलप्राप्तौ कालाध्वनोरत्यं

ऽप्रकविशेषः

त्यसंयोगे तृतीया अह्ना क्रोशेन वा अनुवाकोऽधीतः फलप्राप्तौ किं मासमधीतो

विरुद्धाचारे दान

नायातः अशिष्टव्यवहारे दानप्रयोगे च चतुर्थ्यर्थे तृतीया दास्या संयच्छते का

मुकः धर्मे तु भार्यायै संयच्छति इत्यादि नमस्यादियोगे चतुर्थी नमो नाराय।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सि॰ चं॰ ४
५५
55

लाय एवं स्वस्तिस्वाहास्वधालंवषड्योगे उपपदविभक्तेः कारकविभक्तिर्ब
लीयसी नमस्करोति देवान् प्रभ्वादियोगे षष्ठ्यपि भोजनाय भोजनस्य वा प्र
भुः समर्थः शक्तः कलाय कृष्णस्य वा भद्रकुशलसुखमायुष्यं अर्थः प्रयोजनं
वा भूयात् रुच्यर्थधातुयोगे प्रीयमाणे हरये रोचते भक्तिः श्लाघह्नुङ्स्थाश
पां प्रयोगे बोधयितुमिष्टे गोपी कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा धारेरुत्त
मर्णे भक्ताय मोक्षं हरिः धारयते ईप्सिते पुष्पेभ्यः स्पृहयति क्रुधद्रुहेर्ष्या।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः॥ क्रोधोपकारः

सूयार्थानांप्रयोगेयंप्रतिकोपःसउक्तसं हरयेक्रुध्यति द्रुह्यति ईर्ष्यति असू

यति यंप्रतिकोप इति किं एनामन्योमाद्राक्षीत भार्यामीर्ष्यति अन्यादि

र्तेशब्दादियोगेपंचमी ऋतेज्ञानान्नमुक्तिः अन्योगृहाद्वि[redacted]हारः स्याराद्व

नात् इतरोरामात् भिन्नःकृष्णात्पूर्वो ग्रामात् दक्षिणोग्रामात् विनापृ

थक्नानाभियोगेद्वितीयातृतीयापंचम्योभवंति विनाकृष्णात्पृथक् नानावा

जनिकर्तुःप्रकृतिःजायमानस्यहेतोरपादानंस्यात्तत्रापादानेपंचमी ब्रह्म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सि॰ चं॰ पू॰
५६
56

...स्थानि विद्यास्तोकारेव कृः पंचमी स्यात् [illegible] वनाद्ग्रामो

योजने योजनं वा कार्तिक्या आग्रहायणी मासे वर्जनार्थयोः अपपर्योर्योगे पंचमी स्यात् ।

अपहरेः परिहरेः संसारः ग्रामं वेत्ति संसारः मर्यादार्थका आङ्योगे पंचमी स्यात् प्र

द्युम्नात् कृष्णात् प्रति तिलेभ्यः प्रतियच्छति माषान् ... तिलेभ्यः पंचम्या जाड्यात् जाड्येन

वा बद्धः स्तोकात् स्तोकेन वा मुक्तः दूरांतिकयोः षष्ठ्यपि ग्रामस्य दूरं अंतिकं

वा क्रियागुणजातिसंज्ञाभिः समुदायात् पृथक्करणं निर्धारणं यतस्तत्र षः ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ष्ठीसप्तम्यौ। क्रियापराणां क्रियापरेषु वा भगवदाराधकः श्रेष्ठः गवां गोषु वा कृष्णा
गौः संपन्नक्षीरा नराणां नरेषु वा ब्राह्मणः श्रेष्ठः छात्राणां छात्रेषु वा मैत्रः पटुः स्वाम्या
दियोगे षष्ठीसप्तम्यौ गवां गोषु वा स्वामी अधिपतिः ईश्वरः दायादः प्रसूतः प्रभुः।
वा अनादराधिक्ये क्रियालक्षणे षष्ठीसप्तम्यौ। रुदति रुदतो वा प्राव्राजीत्।
तत्परसमाप्तव्यासक्तिः तत्परे प्रसितासक्ता वित्यमरः॥
आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ नानार्थे। आयुक्तः कुशलो वा हरिपूजनस्य
पूजने वा नानार्थे किं आयुक्तः शकटे गौः साधुनिपुणाभ्यां पूजायां सप्तमी मातरि

स्वाम्यादीति। स्वामीश्वरा
धिपतिदायादसाक्षिप्रति
भूप्रसूतैश्च तेन षष्ठीस
प्तम्यौ स्तः॥ दायादौ
सुतबांधववित्यमरः॥

क्रियालक्षणे षष्ठीस
प्तम्यौ स्तः केवलभावल
क्षणे सप्तम्येव स्यात् ना
दरार्थे केन षष्ठी
सप्तम्यौ स्तः। रुदंत
पुत्रादिकमनादृत्य
संन्यस्तवानित्यर्थः

षष्ठीप्राप्तौ पाठः कर्तरि
षष्ठीवचनं

व्यापारितः इति वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं०सि०
५२ 57

साधुः निपुणो वा अर्चायामिति किं निपुणो राज्ञः भृत्यः प्रसितोत्सुकाभ्यां योगे तृतीया
सप्तम्यौ नक्षत्रे प्रसित उत्सुको वा हरिणा हरौ वा साध्वसाधुप्रयोगे सप्तमी साधुः
कृष्णो मातरि असाधुर्मातुले निमित्तात्कर्मयोगे सप्तमी चर्मणि द्वीपिनं हंति दं
तयोर्हंति कुंजरं केशेषु चमरीं हंति सीम्नि पुष्कलको हतः कर्मसंयुक्ते कर्मणि अ
धीती व्याकरणे नादर्थे चतुर्थी संयमाय श्रुतं धत्ते नरो धर्माय संयमं धर्मा
मोक्षाय मेधावी धनं दानाय भुक्तये १ नमो ग्रहणकस्य कर्मणि फलेभ्यो याति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ल्यप्लोपे कर्मण्याधारे पंचमी हर्म्यात्प्रेक्षते आसनात्प्रेक्षते कर्तृकर्मयोर

क्तादौ तु न तिषष्ठी कर्त्तरि कार्ये च षष्ठी क्तादिवर्जिते कृति योगे कृष्णस्य कृतिः जग

गतः कर्त्ता हरिः गुणकर्मणि वा नेता अश्वस्य ग्रामं ग्रामस्य वा उभयप्राप्तौ कृ

ति कर्त्तरि षष्ठी न आश्चर्यो गवां दोहो ऽगोपेन स्त्रीप्रत्यययोरकाऽकारयोर्न

नोक्तं भेदिका बिभित्सा वा रुद्रस्य जगतः शेषे षष्ठी वा राज्ञां मतः शासनमाचा

र्येण चार्यस्य वा वर्त्तमानाधारार्थक्तस्य योगे षष्ठी राज्ञां मतः बुद्धः पूजितो।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं० सि० पू०
५८
58

वा इदमेषां स्थापयिता क्रीदोव कुर्वन् कुर्वाणः चक्रवान् चक्राणः चक्रिवान् सर्वं वहति:

हरिः दिहतः अलंकरिष्णुः दैत्यान् घातुको हरिः जगत्स्रष्टा सर्वं कर्त्ता विष्णुः नाह

मः देव्याः दैत्यान् हतवान् हरिः इषत्करः प्रपंचो हरिणा सोमं पिबमानः स्वा

त्मानं मंडयमानः वेदमधीयन् कर्त्ता लोकान् द्विषत्रामवी मुरस्य स्मर्त्ता वा हि

षन् भविष्यत्तु कस्य भविष्यदा धर्मैर्णा धर्मस्येन ऋयोगः षष्ठी न सन्तः पालको

ऽवतरति व्रजंगामी शतंहरदायी कन्यानां कर्त्ता रिवा मया मम वा सेव्यो हरिः

कर्मत्वेन

क्रियागुण इत्यादि॥ निर्द्धारणमस्यास्तीति निर्द्धारणः॥ अत इनोऽत इत्यतः क॥ निर्द्धारणहेतुरिति यावत्॥ तस्माच्च नि

र्द्धारणादित्यतो षष्ठीसप्तमी च॥ न तु निर्द्धारणार्थे॥ इत्यर्थपरो निर्द्धारणशब्दः॥ आदेशाव्यस्य च द्वन्द्वातार त्वेन॥

प्रत्येकयोगस्यानिर्वापत्वात्॥ किंच॥ निर्द्धारणार्थे षष्ठी इत्युक्ते अस्मात्षष्ठी निर्द्धारणस्य षष्ठ्या निर्द्धा

रणहेतोः॥ निर्द्धार्यप्रमाणाद्वा इति न ज्ञायते॥ यो गोषष्ठी इत्निमित्तेहुहेतु कोगाविद्यानाद्धेतौ न निर्द्धार्यमान्य

उभयप्राप्तौ कर्मण्येव षष्ठी नेनेन ग्वाव्रजं गावः कृष्णेन दूरनिकटार्थयोगे षष्ठीपं

चम्यौ दूरं निकटं ग्रामस्य ग्रामाद्वा पणार्थस्य क्रयविक्रयद्यूतव्यवहारार्थ्य

स्य च दिवः कर्मणि षष्ठी शतस्य दीव्यति नोपसर्गे शतस्य शतं वा प्रदीव्यति

नि षष्ठी हेतुप्रयोगे अन्नस्य हेतोर्वसति सर्वादेर्हेतुप्रयोगे हेतुषष्ठ्येव च तृ

तीयाषष्ठ्यौ केन हेतुना वसति कस्य हेतोर्वा निमित्तपर्यायप्रयोगे सर्वा

देः सर्वाविभक्तयः सर्वादेस्तृतीयादयः को हेतुः किं प्रयोजनं कं हेतुं केन हे

चं॰सि॰ तृना स्नानेननिमित्तेनहरिः सेव्यः स्नानायनिमित्ताय प्रसंगोक्ते प्रथमा द्या रम्यात्तकु
61 समासतद्धितस्त्रियातोक्तेकारकेसंबंधेप्रथमास्यात् घटःक्रियतेहरिः करोति
कंसंकंसंहतवान् कृष्णेनकंसोहतः पचनोग्निः दानीयोविप्रः उपाध्यायःपा
चनीस्थाली प्राप्तानंदः उढरथः उपहृतपशुः उद्धृतान्नाःपीतांबरः वीरपु
रुषः कौंकमं माथुरःधनवान् इषद्वती संबंधेप्रथमाहरपने विषद्देशोपिसं
वर्धास्वयंवेत्नमसाप्तं क्रमादमुंनारदइत्यबोधिसः इतिविभक्त्यर्थाः ६॥स्मा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

[illegible] न्वयेनाम्नामिति [illegible] नामानि च तानि नामानि तेषाम् [illegible] नामेति संकेतितः

[illegible] नाम्नामिति विभक्त्यन्तानां नाम्नां विग्रहेण समासप्रत्यययोः [illegible] इत्यादि [illegible]

[illegible] पदयोरन्वये सति यो विधिः स समाससंज्ञो भवति चकार [illegible]

[illegible] तद्धितधातुसंज्ञाप्रयोजकप्रत्ययाश्च [illegible]

[illegible] समासः [illegible]

सङ्ख्यान्वयेनाम्नां नाम्नामन्वयेसतिसमासोभवतिचकारात्कृत्तद्धितधातुसंज्ञाप्र

[illegible]

योजकप्रत्ययाश्चपि पूर्वेऽव्ययेऽव्ययीभावः अव्ययपूर्वपदेसति योन्वयः सोऽव्य

यीभावः संज्ञः कः समासोभवति स्त्रियामधिकृत्येतिविग्रहे समासप्रत्यययोः

समासेवर्त्तमानायाविभक्तेः प्रत्ययेचपरेलुक् नामन्यान्स्यादि सनपुंसकं अ

व्ययीभावोनपुंसकलिंगोभवति नपुंसकस्येतिह्रस्वः अव्ययीभावान्नविभक्तेर्लुक्

अधिस्त्रि अतोऽमनतः अदंतादव्ययीभावान्नविभक्तेर्नलुक् अमंचैर्ड्शियिन्नाश्रमा

[illegible]

[illegible]

क्वचिद्भवति क्वचिन्न भवति इयं विभाषा
विभाषा तस्याश्च पर्यायाः
न मित्वा दौ ... नित्य ... वा

सि०चं०

62

समीप

देशः कुंभस्य समीपं उपकुंभं वा टाङ्को अदंतादव्ययीभावान्नाम्नोऽम् वा उपकुंभं उ

देशविशेषाणां समृद्धिः

पकुंभेन त्वात्कृतं उपकुंभं उपकुंभे वा निधेहि यवनानां किं उपकुंभात्स मद्राणां समृद्धिः

संपत्तिः ... पयास: ध्वंसः

सुमद्रं यवनानां व्यृद्धिः दुर्यवनं मक्षिकाणामभावो निर्मक्षिकं हिमस्यात्ययोऽति

... तेन हरिशब्दस्य प्रकाश ... इति ... ॥

हिमं निद्रा संप्रति न युज्यत इत्यतिनिद्रं हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चा

दनु विष्णु रूपस्य योग्यमनुरूपं अर्थमर्थं प्रति प्रत्यर्थं शक्तिमनतिक्रम्य करोति

यथाशक्ति हरेः सादृश्यं सहरि ॥ सहादेः सादिरिति सहस्य सः ज्येष्ठस्यानुपूर्व्येणेत्यनु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एककाल

ऽर्धं चक्रेण युगपत्सचक्रं सदृशः सख्या ससखि क्षत्राणां संपत्तिः सक्षत्रं तृणमप

रित्यज्य सतृणमत्ति अग्निग्रंथपर्यंतमधीते साग्नि यथाऽसादृश्ये योग्यतावी।

प्सापदार्थानतिवृत्ति सादृश्यानि यथार्थः यथाशक्तिः सादृश्येन समस्यते य

निश्चयार्थो यावत्क्रमव्योगे

थाहरिस्तथा हरः अवधारणार्थे यावतिच अवधारणार्थे यावच्छब्दे प्रयुज्यमा

नेऽव्ययेनान्वयः सोऽव्ययीभावसंज्ञकः समासो भवति यावंतः श्लोकास्तावंतोऽच्युत।

अस्य पदविग्रहत्वान्निषेधः

प्रणामा यावच्छ्लोकं अवधारणे किं यावद्दत्तं तावद्भुक्तं क्वचिदनव्यये पूर्वपदे।

इत्यनेकार्थत्वान्निपातोपपद्यते॥

यावदत्र स्याम
यत्रादेशविधे
निपातार्थविधिं
तत्राचत्रवध
रणेएवपावद
व्ययसमस्यते
नान्यस्मिन्नर्थे
यावत्तावच्छ
स्तोकस्येऽवदते
नातेऽवधारणे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं०सि०
63

महद्भुवं करोति गंगा पापमिदं

व्ययीभावः उन्मत्तागंगायस्मिन्देश उन्मत्तगंगं शाकस्यलेशः शाकप्रति अक्षे ।

क्वचिदनव्यये पूर्वपदे सति चक्रकापेमाव्ययीभावः ।।

ण विपरीतंवृत्तं अक्षपरि शलाकयाविपरीतंवृत्तंशलाकापरि एकपरि कचिद्वा ।

वनात् बहिर्देशः

अपविष्णोः अपविष्णु परिविष्णोः परिविष्णु बहिर्वनात् बहिर्वनं प्राग्वनात् प्रा

मुक्तिमर्यादेन त्येत्यर्थः अग्नेरभिमुखं इत्यर्थः अग्नेः प्रतिमुखं

ग्वनं आमुक्तेः आमुक्ति अभ्यग्नेः अभ्यग्नि प्रत्यग्नेः प्रत्यग्निवनस्यसमीपमनुवनं ।

वहन्ति गावो यस्मिन्काले

गंगामनु अनुगंगं तिष्ठंतिगावोयस्मिन्सतिष्ठद्गुदोहनकालः वहद्गु आयतीग

आयत्यः गावो यस्मिन्काले

गंगामध्ये

वं पारेगंगायाः पारेगंगं मध्येगंगं इत्यादयोनिपात्याः खलेयवायस्मिन्काले ।

पारेमध्ये इत्यादौ एतच्च
निपातनादेव भवति ।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्रैलेयवं द्वौमुनिवंश्यौपो द्विमुनि त्रिमुनिव्याकरणस्य सप्तगंगं समाहृताः सप्त
गंगाः द्वियमुनं टाङ्काः समासेसति अञ्टकज्ञन्येने प्रत्यया भवंति शरदः स
मीपं उपशरदं प्रतिविपाशं जरायाः जरस उपजरसं अदिप्रतिप्रत्यक्षं अक्ष्णः
परंपरोक्षं परसाक्षस परस परोक्षिरनिज्ञायकान अन्वक्षं उपराजं उपसमिधं
उपनदं क्वचित्समासांतविधिरनित्यः उपनदि इत्यव्ययीभावः अमादौ तत्पुरुषः
द्वितीयाद्यन्ते पूर्वपदेसति योऽन्वयः स तत्पुरुष संज्ञकः समासः ग्रामं प्राप्तः ग्राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चं०सि०
64

प्राप्तः कृस्त्राश्रितः कूपपतितः ग्रामगतः खट्वारूढः मुहूर्त्तसुखं दुःखातीतः ।
ग्रामगमी सत्त्वभुक्तः दात्रेणछिन्नं दात्राछिन्नं मासेनपूर्वः मासपूर्वः मातृस
दृशः पितृसमः माषोनं वाक्कलहः आचारनिपुणः गुडमिश्रः मासावरः हरित्रा
ताः नखभिन्नः दध्योदनः गुडधानाः यूपायदारु यूपदारुः अर्थेननित्यसमासो
विशेष्यलिंगताच द्विजायायं द्विजार्थः सूपः द्विजार्थाशाटी द्विजार्थं पयः भूत व
लिः गोहितं गोसुखं गोरक्षितं चौरभयं सुखापेतः दुःखापोढः कल्याणापोढः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative
